**अनुज्झितराग** (anujjhita-rāga) *adj.* which has not given up ruddiness उद्ययौ जलनिधेरुडुजानेरंशुपल्लवमनुज्झितरागम् Acyutarā. 8. 41.

**अनुज्झितरोषभर** (anujjhita-roṣabhara) *adj* wherein the excess of anger is not given up अजनि पुनः समीकमनयोरुभयोर्बलयोरवदलिते मुखेऽपि यदनुज्झितरोषभरम् RāmāCam. 6.60.

**अनुज्झितवत्** (an-ujjhitava(n)t) *adj.* which has not abandoned (i. e. which has retained) तेन सह ऐकात्म्यम् अनुज्झितवतामेव घटते प्रमाणेन उपपद्यते PratyabhiVi. i. 197. 2 (*on* i. 5. 1)

**अनुज्झितविनया** (anujjhita-vinayā) *adj.* (*f.*) who has not given up modesty अस्ति … व्यलीकेऽप्यनुज्झितविनयाभिः … कुलप्रसूताभिरलंकृता वधूभिः … अयोध्येति … नगरी TilaMañ. 9. 14.

**अनुज्झितविषय** (anujjhita-viṣaya) *adj.* who has not given up the sensual objects न हि दूरतोऽनुज्झितविषयस्य दुष्टाहारसेवामलिनमनसः इन्द्रियादिनियमनं संभवति ŚrutaPra. ii. 104. 22 (*on* i. 4.1)

**अनुज्झितवृत्ति** (anujjhita-vṛtti) *adj.* **i** not devoid of literary styles रसपोषयुक्तिमदनुज्झितवृत्ति गुणव्यपाश्रयम् … अपूर्वकृतिप्रवणात्मतां दधत्। कविरिव नाटकं घटितसंधि विधाय शशाङ्कशेखरः शिखरिसुताधमर्धवपुषि प्रमदान्वितमानसोऽभवत् HarVi. 21.57; **ii** which has not given up one's own character, HarVi. 21.57.

**अनुज्झितवेद्यभाव** (anujjhita-vedyabhāva) *adj.* which has not given up its knowability सोऽयं वेद्यैकदेश एव, विच्छिन्न एव, अनुज्झितवेद्यभाव एव PratyabhiVi. i. 190. 4 (*on* i. 4. 8)

**अनुज्झितसंविदभेद** (anujjhita-saṁvidabheda) *adj.* which has not given up (i. e. which still retains) (its) identity with the universal consciousness तेन अनुज्झितसंविदभेदस्य भावस्य कल्पितप्रमात्रपेक्षया भेदेन प्रकाशनं भगवतो ज्ञानशक्तिः PratyabhiVi. i. 197.2 (*on* i. 5.1)

**अनुज्झितस्थाना** (anujjhita-sthānā) *adj.* (*f.*) which has not given up one's own place दुर्विभावत्वाद्गतेरनुज्झितस्थानयेवोह्यमानया नावोह्यमानः … प्रदेशमासादयम् TilaMañ. 132. 13.

**अनुज्झितस्वभावावस्थिति** (anujjhita-svabhāvāvasthiti) *adj.* who has not given up stability of one's own character उर्वीपतिः … अनुज्झितस्वभावावस्थितिश्च स्थित्वा मुहूर्तमुद्भूतकौतुकस्तदनुसारेण संचारयामास … चक्षुः TilaMañ. 46. 11.

**अनुज्झितस्वरूप** (anujjhita-svarūpa) *adj.* [*f.* -ā] who has not given up his own (transcendental) form अनुज्झितस्वरूपस्य देवस्य चतुरात्मनः। केवलस्यार्चनान्मोक्षं भवते तद्द्विधार्चनात् PauṣkS. 33.2; 38. 206; अनुज्झितस्वरूपाहम् …। महालक्ष्मीः समाख्याता LakṣmīT. 5. 3.

**अनुज्झितस्वातन्त्र्य** (anujjhita-svātantrya) *n.* freedom which is not given up तस्य निर्मितौ अपि अनुज्झितस्वातन्त्र्यमुक्तम् PratyabhiVi. i. 280. 3 (*on* i. 5.17)

**अनुज्झितानन्तर्यार्थत्व** (anujjhitānantaryārtha-tva) *n.* the state of being the meaning which has not given up the immediate succession विषयविवेचने अनुज्झितानन्तर्यार्थत्वात् लाघवेन तादर्थ्ये संभवति प्रकृतापेक्षावच्छिन्नमर्थान्तरम् SiddhāSi. i. 9.12.

**अनुज्झितान्तःप्रकाश** (anujjhitāntaḥprakāśa) *adj.* who has not abandoned the inner luminosity अन्तर्भान्तमेव अनुज्झितान्तःप्रकाशमेव सन्तं बहिः एकाभासतया भासयति PratyabhiVi. i. 330.5 (*on* i. 6. 7)

**अनुज्झिताभियोग** (anujjhitābhiyoga) *adj.* who has not abandoned perseverence कुमारमनुज्झिताभियोगस्य सततमन्विष्यतो भविष्यत्यवश्यं मम क्वापि तद्वृत्तान्तोपलब्धिः TilaMañ. 197. 5.

**अनुज्झितारम्भ** (anujjhitārambha) *adj.* who has not given up one's undertaking or effort रविरनिशमनुज्झितारम्भः ŚārṅgaPa. 226.

**अनुज्झितार्थसंबन्ध** (anujjhitārthasambandha) *adj.* in which the connection with the theme is not abandoned अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः ŚiśuVa. 2. 73.

**अनुज्झितावष्टम्भ** (anujjhitāvaṣṭambha) *adj.* which has not given up resoluteness देव्यपि श्रीस्तेन तस्यातिमात्रकष्टायामपि दशायामनुज्झितावष्टम्भेन वचसा जनितविस्मया … पुनरवादीत् TilaMañ. 56. 3.

**अनुज्झितावस्थान** (anujjhitāvasthāna) *adj.* who has not given up one's position सातिरेकलावण्यलाभतृष्णाया(:) संनिधावनुज्झितावस्थानम् … नाविकयुवानमद्राक्षम् TilaMañ. 125. 5.

**अनुज्झितासनम्** (anujjhitāsanam) *adv.* in a manner in which one does not leave the seat अनुज्झितासनं कुर्यात् पितॄणां प्रीणनाय PauṣkS. 27.118.

**अनुज्झितासन्नवृत्ति** (anujjhitāsannavṛtti) *adj.* who has not given up vicinity (*lit.* the nature of being near) सरसगोष्ठीप्रसङ्गेषु चास्माकमनुज्झितासन्नवृत्तिश्चित्रशिखो विधेयः UdaySuKa. 38 25.

**अनुज्झितास्थानकगर्भम्** (anujjhitāsthānakagarbham) *adv.* **i** in which the centre of the assembly-hall is not abandoned अनुज्झितास्थानकगर्भमानकैर्ध्वनद्भिः … स भेजे कुशलैः कुशीलवैः RāghPāṇ.(Ka.) 13. 55; **ii** in which the central theme of prologue is not given up, RāghPāṇ. (Ka.) 13.55 (comm. अनुज्झितः आस्थानकगर्भः पूर्वरङ्गगर्भो यत्र तत्)

**अनुज्झित्य** (an-ujjhitya) *ger.* not having abandoned or given up वर्णधर्ममनुज्झित्य …। यजन्ति श्रद्धया देवमनाप्तास्ते प्रकीर्तिताः JayāS. 22. 34; स्वकारणमनुज्झित्य कार्यार्थम् … ब्रह्मा तेन सृष्टः PāraS. 10.111.

**अनुज्झित्वा** (an-ujjhitvā) *ger.* not having abandoned or given up जातिधर्ममनुज्झित्वा … ज्ञानं शिक्षेदशिक्षितम् JayāS. 18. 77; अनुज्झित्वा क्रमं सर्वं यः सुधीर्मन्त्रमुद्धरेत् AhirbuS. 17 51.

**अनुज्ञ** (anu-jña) *m.* knowledge मनोऽनुज्ञाय (भवतु) SāmaViBr. iii. 8.2 (Sāy. अनुज्ञानमनुज्ञः घञर्थे कविधानामिति भावे कप्रत्ययः)

**अनुज्ञप्ता** (anu-jñaptā) *adj.* (*f.*) authorised, permitted महाराजाधिराजश्रीगोप[चन्द्रे] प्रशासति तदनुज्ञप्तायाम् … वर्धमानभुक्तौ EI. xxiii. 159.3.

**अनुज्ञप्ति** (anu-jñapti) *f.* granting of permission उपहूयेत्यनुज्ञप्तावनुज्ञाने तथेतरः NyāyMāVi. 175. 25 (*on* iii. 5. 16) [issuing an order or command, APTE]

**अनुज्ञा** (anu-jñā-) IX. U. [P. vii. 3.79] **1Ai** to permit, to allow, to give consent, (pass.) to be permitted or allowed, (*caus.*) to request or cause to permit, (*caus.* pass.) (**a**) to be caused to be permitted (**b**) (with primitive force) to be permitted, to be allowed **ii** to accept, to approve, to recognise, (pass.) to be accepted, to be approved, to be recognised **Bi** to discard, to throw away, to renounce **ii** to allow one to depart, to bid farewell **C** to allow to work **2** to know, (*caus.*) to cause to know **3** to excuse, to forgive, to pardon **4A** to favour **B** to grant, to give **C** to promise **5** to command, to order, to instruct **1Ai** to permit, to allow, to give consent विश्वे देवा अनु तद्वामजानन् ṚV. x. 85.14; AV. xiv. 1.15; AV.(P.) xviii. 2. 4; तुभ्यं देवा अनु जानन्तु विश्वे AV. vi. 112.1; x. 5. 50; AV.(P.) xvi. 132.11; तन्नो देवासो अनु जानन्तु कामम्। यथा तरेम दुरितानि विश्वा TaiBr. III. i. 1. 11; III. i. 2.4; शृणोतु मऽ इदमग्निरनु मे जानात्वित्येवैतदाह ŚatBr. III. ix. 3. 14; ŚatBr (K.) IV. ix. 3.12; समुद्रो मा विश्वव्यचा ब्रह्मानुजानातु MantrBr. ii. 4.3; यद्ब्राह्मणं कर्ण(? र्म)णि कर्मण्यामन्त्रयत्यपस्तेनानुजानात्येषो ह्यस्य भागः GopBr. i. 2. 9 (42.7); ii. 2. 6 (170.16); ii. 2.14 (180. 10); ओमित्यग्निहोत्रमनुजानाति TaiĀ. vii. 8. 1 (731. 2); TaiU. i. 8. 1 (Śaṅ. अनुज्ञां प्रयच्छति); तद्वा एतदनुज्ञाक्षरम्। यद्धि किंचानुजानात्योमित्येव तदाह ChāndoU. i. 1.8; Śaunako. 1.12; NṛsiṁhoTāU. 8; ओमित्यनुजानीध्वम् NṛsiṁhoTāU. 9; ओं ३ प्रतिष्ठेति समिधमनुजानीयात् ĀśvaŚS. I. i. 13.7; ओं निर्वपेति यजमानोऽनुजानाति BaudhŚS. i. 8.1; i. 73.18; ĀpaŚS. iv. 4. 4; vi. 7.2; यः पुरस्तात् प्रतिराजा भवति, तं सोऽस्य गत्वाहासावामुष्यायणोऽश्वमेधेन यक्ष्यते, तमनुजानीहीति VādhūŚS. iii. 69.6; MānŚS. 140.4; 141. 7; अतिथिम् … यथामनसं तर्पयित्वा सम्साधयेत।… यावन्नानुजानीयादितरः HirŚS. xxvii. 1.118 (149.3); ĀpaDS. ii(4). 9.3; VaitāSū. 2.1; अन्वजानात्ततो द्यूतं धृतराष्ट्रः सुतप्रियः MahāBhā. i. 1.92; महाबाहुरनुजज्ञे स पाण्डवः MahāBhā. i. 211. 25; मतिमन्तस्तु ये केचित् …। अर्च्यमर्चितमर्चार्हमनुजानन्तु ते नृपाः MahāBhā. ii. 36.4; अवृणोत्तत्र पाञ्चाली पाण्डवान् … अनुज्ञासिषमप्यहम् MahāBhā. ii. 72.26; अनुजानामि राज्यं च प्रशाधि पुरुषोत्तम MahāBhā. iii. 275. 35; iv. 67.12; v. 24. 4; योत्स्ये तात त्वया सह। अनुजानीहि मां तात MahāBhā. vi. 41. 32; अनुजानीष्व मां तात युद्धे MahāBhā. vi. 117. 27; सोऽहमद्य गमिष्यामि यत्र ते पुरुषर्षभाः।… अनुजानातु नो भवान् MahāBhā. vii. 125.33; यथोचितं च वै राज्यमनुज्ञास्यति ते प्रभुः MahāBhā. viii. App. I. 38(3); viii. 65.23; ix. 29.60; युधिष्ठिरं सहामात्यमनुजज्ञे नदीसुतः MahāBhā. xiii. 152.4; xiv. 70. 15; xv. 8. 17; रोमपादस्ततो राजा …। अनुजज्ञे पुरं गन्तुं भूयो दशरथं स्वकम् Rāmā. i. 334*(2); ii. 18.21; मे श्रेयः प्रायोपवशनम्। अनुजानीत मां सर्वे Rāmā. iv. 54.11; vi. 47. 45; काङ्क्षितं नानुजानाति सर्वज्ञो हृदये स्थितः PauṣkS. 31. 149, विवादे दर्शयिष्यन्तं क्रियासंक्रान्तिमात्मनः। यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया Mālavikā. 1. 19; गमिष्यामि पुरीं ब्रह्मन्ननुजानातु मां भवान् BrahmāṇḍP. ii. 28. 24; अनुजानातु मां तातः। यावदस्य पापस्य प्रतिपक्षमुपदिशामि Nāgā. 5. 23(4); नृपः … अनुजज्ञे गमनं सुतस्य Bhaṭṭi. 1.23; 20. 2; मालवेन्द्रः … स्वदेशगमनाय जनकराजमन्वजानात् AvantiKa. 172.21; स एवं निवेदितो नियतमनुज्ञास्यति DaśKuC. 86. 2; अनु-